CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S. A. P. B.
Coll. No. 240

Title Mādhavīyavedāntha-
prakāśa

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 240 Subject : Veda

Title : Mādhavīya Vedārtha Prakāśa ~~[illegible] bhāṣya on yajurveda Saṃhitā~~ 4th kāṇḍa 5th prapāṭhaka.

Author : Sāyaṇācārya. Scribe : [illegible] Śankar

Date of the work : — Date of the Ms. : V.S. 1813

Place of the work : — Place of the Ms. : —

Size : 11.8" x 6.7" Extent : 47 foll.

Language : Sanskrit Script : Devanāgarī.

Remarks : Complete

॥श्रीगणेशाय नमः॥ ॥रुद्रः तापत्रयात्मकं संसारदुःखं रुत्। दुःखहे
तुर्वा रुत् तं द्रावयतीति रुद्रः। रुद्दुःखं दुःखहेतुर्वा द्रावयत्येष नः प्रभुः॥
रुद्र इत्युच्यते सद्भिः शिवः परमकारणं इति स्मृतेः॥ अश्रुनं द्रावय रुद्रो
यज्ञद्वार पुनर्नवं॥ ततः स्मृतानि धो रुद्रशब्देनात्रा निधीयन इति च॥ रु
द्रनादने द्रवति द्रावयति वा रुद्रः॥ रुत्या वेदरूपया धर्मादीन्बोधयति द्रा
वयति वा रुद्रः॥ रुत्या प्रणवरूपया स्वात्मानं प्रापयतीति वा रुद्रः। रोरूयमा
णो द्रवति प्रविशति मर्त्यानिति रुद्रः॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो
मर्त्यां आविवेशेति श्रुतेः॥ रोधिका बंधिका मोचिका च शक्तिः रुत्तत्रयरूपा त १
स्या द्रावयिता नकेन्य इति वा रुद्रः॥ रुतिशब्दं वेदात्मानं कल्पादौ ब्रह्मणे ददा

नीति वा रुद्रः॥ यो वेदांतं श्च प्रहिणोति तस्मै इति श्रुतेः। एवमादिभिः प्रका
रैर्बहुधा रुद्रशब्दो निरुच्यते॥ ॥यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जग
त्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ इष्टकाचितयः सर्वाश्च उ थेदि
समापिताः॥ रुद्राध्याये पंचमे तु चित्याग्नि होम उच्यते॥२॥ कर्मप्रकरणे
पागान्न कर्मांगत्वमपीष्यते॥ ज्ञानहेतुत्वमप्यस्य तथोपनिषदीरितं॥३॥
किं जप्येनामृतत्वं नो ब्रूहीत्युक्तो मुनिर्जगौ॥ शतरुद्रीयकेनेति जाबाली श्रा
मनंति तत्॥ स्मृत्यागमपुराणेषु रुद्राध्यायप्रशंसनं॥ बह्वस्ति तद्विस्तरे
ण रुद्रकल्पे निधास्यते॥ इह कर्मांगताया हक्रू वर्णिता ब्राह्मणेन तां॥ बोद्धुं

ह

शब्दार्थमात्रस्य विवितिः क्रियते स्फुटा ॥ कल्पः ॥ शतरुद्रियं जुहोति ॥ जर्तिल
यवाग्वा वा गवीधुकयवाग्वा वा ॥ जर्तिलैर्गवीधुकसक्तुभिर्वा ॥ क्रस्मयवसपि
षाञ्च गाक्षीरेण मृगीक्षीरेण वार्कपर्णेन उदङ् तिष्ठन्नुत्तरस्य पक्षस्य उत्त
रायरसक्यां विकरण्यां स्वयमातृण्णायामनु परिचारं वा ॥ नमस्ते रुद्र मन्यव इत्ये
ताननुवाकास्त्रैधं वितत्यापि वा प्रथमादुपक्रम्य नमस्तहन्त्यइति जानुदघ्ने
धारयमाणो रथकारेभ्यश्च वउपक्रम्य नमः स्वायुधाय चेति नाभिदघ्ने शेषेण
प्रागतानेभ्यश्चास्यदघ्ने कृत्वा सहस्रसहस्राणि सहस्रश इति दशावतानान् कृ
त्वावारोहाञ्जुहोति ॥ नमो रुद्रेभ्यो ये पृथिव्यामिति जानुदघ्ने धारयमाणो २

नमो रुद्रेभ्यो येन्तरिक्ष इति नाभिदघ्ने नमो रुद्रेभ्यो ये दिवीत्यास्यदघ्ने कृत्वै
तानेव यजमान वाचयित्वैतानेव विपरीतान् प्रत्यवरोहान् कृत्वा संचरे पश्च
नामर्कपर्णमुदस्यति पंक्तिधा तस्य संचर इति ॥ ॥ तत्र प्रथमानुवाके प्रथमा
मृचमाह ॥ ॥ ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः ॥ नमस्ते अस्तु ध
न्वने बाहुभ्यामुत ते नमः ॥ ॥ हे रुद्र ते त्वदीयो यो मन्युः कोपस्तस्मै नमो
स्तु ॥ ते मन्युः अस्मद्वैरिष्वेव प्रसरतु न त्वस्मासु । उतो अपि च । ते इषवे नमः ।
त्वदीयाय बाणाय नमोस्तु । तथा ते धन्वने त्वदीयाय धनुषे नमोस्तु । उत । अपि
च । ते बाहुभ्यां धनुर्बाणोपेताभ्यां हस्ताभ्यां नमोस्तु ॥ एतत्सर्वं वैरिष्वेव प्रवर्त्त

तां। नत्रमयीत्यभिप्रायः॥ ॥अथ द्वितीयामृचमाह॥ ॥या त इषुः शिवतमा
शिवं बभूव ते धनुः। शिवा शरव्या या तव तया नो रुद्र मृडय॥ ॥हे रुद्र ते त्वदी
यायेयमिषुः शिवतमा शांततमा बभूव॥ तथा त्वदीयं यद्धनुः शांततमं बभूव
॥या च शरव्या तवेषुधिः। तया शांतया इषा तेन च शांतेन बाणेन शांतेन धनुषा
तया शांतया शरव्यया नोस्मान्मृडय सुखय नक्लेषु प्रहृत्य नावस्ने पांशांतत्वं॥
अथ तृतीयामृचमाह॥ ॥या ते रुद्र शिवा तनूरघोरापापकाशिनी॥ तया न
स्तनुवा शंतमया गिरिशंताभिचाकशीहि॥ ॥हे रुद्रस्य तनूः॥ तया चो
परिष्टादाम्नायते। रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्या शिवान्येति॥ ३

हिंसिका घोरा। अनुग्राहिका शिवा॥ हे रुद्र ते न वया तनूः शिवा अस्मास्वनुग्र
हकरी॥ अत एवाघोराहिंसिका न भवति॥ अघोरत्वमेवस्य स्पष्टीक्रियते॥ अ
पापकाशिनी॥ पापं हिंसारूपं अनिष्टं काशयंतीति पापकाशिनी॥ तादृशी न भ
व। नेत्यपापकाशिनी॥ गिरौ कैलासे स्थित्वा नित्यं प्राणिभ्यो यः शं सुखं तनो
ति स गिरिशंतस्तस्य संबोधनं हे गिरिशंत॥ तथा हे रुद्र शंतमया अति
शयेन सुखकारिण्या तया तनुवा अभिचाकशीहि॥ मामभितस्त्वं प्रकाशं
कुरु॥ तादृशीं त्वदीयां तनुं प्रकाश्य मां सुखिनं कुर्वीत्यर्थः॥ ॥अथ चतु
र्थीमाह॥ ॥यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा

न्या

डिंॱमीः पुरुषंजगत॥ ॥हेगिरिशंतयामिषुंबाणंअवेवेरिषुप्रहे
र्तुंहस्तेधृतांइषुंशिवांअस्मासुशांतांकुरु॥ पुरुषंअस्मदीयंमनुष्यं
॥जगत्मनुष्यव्यतीरिक्तमपिजंगमंगवादिकंमाहिंॱसीः॥ ॥अथ
पंचमीह॥ ॥शिवेनवचसात्वागिरिशाछावदामसि॥अथानःसर्वमि रु५
ज्जगदयक्ष्मःसुमनाअसत्॥ ॥गिरौकैलासेशेतेतिष्ठतीतिगिरिशः
हेगिरीश॥त्वांअछाप्राप्तुंशिवेनमंगलेनस्तुतिरूपेणवचसावदामसि
वयंप्रार्थमहे॥यथायेनप्रकारेणनोस्मदीयंसर्वंइज्जगत्सर्वमपि ४
मनुष्यपश्वादिकंजंगमजातंअयक्ष्मंअरोगंसुमनाअसत्॥सोमन

स्योपेतंनवतितथाकुरु॥ ॥अथषष्ठीमाह॥ ॥अध्यवोचदधिवक्ता
प्रथमोदैव्योभिषक्॥अहींॱश्चसर्वान्जंभयंत्सर्वाश्चयातुधान्यः॥ ॥यो
रुद्रोअधिवक्ताअधिकोयमित्येवंसर्वेषामग्रेमांप्रतिवक्तुंक्षमः॥तेनो
क्तेसतिममसर्वाधिक्यंतदानीमेवंजातमितिअनस्ताहशोरुद्रोअध्य
वोचत्॥मांसर्वाधिक्यंवक्तुंकीदृशोधिवक्ता॥प्रथमः॥देवानांमध्येमुख्यः
दैव्यःसर्वान्देवानर्हतिदेवान्पालयितुंक्षमइत्यर्थः॥भिषक्॥मर्त्यस्य
ध्यानमात्रेणसर्वरोगशमनादयंचिकित्सकः॥किंकुर्वन्॥अहींॱश्चस
र्पान्सर्वान्व्याघ्रादीन्सर्वाश्चयातुधान्यःसर्वानिपिराक्षसान्जंभयन्विना

शयन॥ ॥सप्तमीमाह॥ ॥असौ यस्ताम्रो अरुण उत बभ्रुः सुमंगलः।
ये चेमां रुद्रा अभितो दिक्षु श्रिताः सहस्रशोवैषां हेड ईमहे॥ ॥यो
रुद्रः असौ मंडलस्थादित्यरूपः सच ताम्रः॥ उदयकालेत्यंतरक्तः॥ अरु
णः उदयादूर्ध्वमीषद्रक्तः उत अपि बभ्रुः तयोरूर्ध्वं पिंगल एवमन्येपिव
र्णास्तत्तत्कालगता उन्नेयाः॥ सुमंगलः॥ नानावर्णः। सन्नतदानदांधकार
६ निवर्त्तनादत्यंतमंगलः॥ येचान्ये रश्मिरूपा रुद्रा इमामभितः अस्याः भूमेः
परितः दिक्षु श्रिताः प्राच्यादिषु वः स्थितास्ते च सहस्रशः अनेकसहस्रसं
ख्याकाः एषामादित्यतद्रश्मिरूपाणां सर्वेषां रुद्राणां हेडः कोधसहशंतं। ५

त्तणात्वंध्यवेमहे नक्ति नमस्कारादिना निवारयामः॥ ॥अथाष्टमीमृच
माह॥ ॥असौ योवसर्पति नीलग्रीवो विलोहितः॥ उतैनं गोपा अदृश
न्नदृशन्नुदहार्यः॥ उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः॥ ॥योरुद्रो
नीलग्रीवं कालकूटधारणेन नीलाग्रीवायस्यासौ नीलग्रीवः॥ स एव लो
हितः विशेषेण लोहितवर्णः सन् असौ मंडलरूपी भूत्वा अवसर्पति उद
यास्तमयं संपादितुं प्रवर्त्तते॥ तस्य रुद्रस्य मंडलवर्त्तिस्वरूपधारणे प्रयो
जनं उच्यते॥ उत गोपाः वेदशास्त्रसंस्काररहिता गोपाला अपि एनं मंडल
वर्त्तिनमादित्यरूपं रुद्रं विश्वा भूतानि गोमहिष्यादयः सर्वे प्राणिनः पश्यं

ति॥ सर्वेषां दर्शनार्थमेव हि रुद्रस्यादित्यमूर्त्तिधारणं केलासादिवर्णनिरूपं
नु वेदशास्त्रज्ञैरेव दृश्यते॥ नान्यैश्च तादृशो रुद्रो दृष्टः सन्नोऽस्मान्मृडयति
अतिसुखिनः करोति॥ ॥अथ नवमीमृचमाह॥ ॥नमो अस्तु नीलग्रीवा
य सहस्राक्षाय मीढुषे॥ अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन्नमः॥ ॥इति
यः पूर्वोक्तो नीलग्रीवः स चेन्द्रमूर्त्तिधारणेन सहस्राक्षेण पुनः पर्जन्यमूर्त्ति
धारणेन मीढ्वा सेचको वृष्टिकर्त्तेत्यर्थः॥ तादृशाय रुद्राय नमो अस्तु अथो
अपि चा ये केचिदस्य रुद्रस्य सत्वानो भृत्यरूपाः॥ प्राणिनः तेभ्यः अहं न ६
मः॥ अकरं नमस्करोमि॥ ॥अथ दशमीमृचमाह॥ ॥प्रमुंच धन्वनस्त्व

सर्वेभ्य

मुभयोरार्त्न्योर्ज्यां॥ याश्च ते हस्त इषवः परा ता भगवो वप॥ ॥हे भग
वो भगवन् प्रजावन् रुद्र त्वं धन्वनः त्वदीयस्य धनुष उभयोरार्त्नि
योः कोट्योः अवस्थितां ज्यां मौर्वीं प्रमुञ्च अवरोपय याश्च ते हस्ते इषवो
वर्त्तन्ते ता अपि परावपय परित्यज॥ ॥एकादशीमृचमाह॥ ॥अव
तत्य धनुस्त्वं सहस्राक्ष शतेषुधे॥ निशीर्य शल्यानां मुखा शिवो नः सु
मना भव॥ ॥इन्द्ररूपेण सहस्रसंख्याकान्यक्षीणि यस्यासौ सहस्राक्ष
ः॥ शतसंख्याका इषुधयो बाणस्थापनकोशा यस्यासौ शतेषुधिः॥ ॥ता
दृशहे रुद्र धनुरवतत्य अवरोपितज्याकं कृत्वा शल्यानां बाणानां मुखा

इषुगतलोहानामग्राणि निशीर्य इषुधिषु न्यानावेन शीर्णानि कृत्वा नो
स्मान्प्रति सुमनाः ॥ अनुग्रहयुक्तः शिवः शांतो भव ॥ ॥अथ द्वादशीमृ
चमाह ॥ ॥विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ उत । अनेशन्नस्ये
षव आभुरस्य निषंगथिरिति ॥ ॥कपर्दो जटाजूटः सोस्यास्तीति कपर्दी
रुद्रः तस्य धनुर्विज्यं विगतज्याकमस्तु ॥ उत अपि च बाणवान् अस्मिन् निषंगे
ति बाणवान् इषुधिः ॥ स च विशल्योस्तु ॥ इषुगतानां शल्यानां तदुदरे गोपि
तत्वेन बहिराविर्भूतशल्यरहितोस्तु ॥ अस्य रुद्रस्य इषवो बाणाः इषुधौ नि ७
हिताः अनेशन् रुमसमर्था निवंत ॥ अस्य रुद्रस्य निषंगथिः बाणधार्वैआ

भुरस्तु ॥ ईषन्मनुरस्तु कुत्र निखातशंकावासंभवनत्वेन बाणान् धारयितुमे
वक्षमवति न तु कर्षणयोग्य इत्यर्थः ॥ ॥अथ त्रयोदशीमृचमाह ॥ ॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मया
परि भुज इति ॥ ॥हे मीढुष्टम अतिशयेन कामानि वर्षक या ते हेतिः त
व संबंधि खड्गादि रूपं यदायुधं यच्च पितव हस्ते धनुर्बभूव अयक्ष्मया अ
नुपद्रवकारिण्या तया हेत्या तथाविधेन धनुषा च त्वमस्मान् विश्व
तः परि भुज सर्वतः परिपालय ॥ ॥अथ चतुर्दशीमृचमाह ॥ ॥
नमस्ते अस्त्वायुधायानातताय धृष्णवे ॥ उभाभ्यामुत ते नमो बाहुभ्यां

तवधन्वने॥ ॥हेरुद्र तेत्वदीयाय आयुधाय बाणरूपाय नमोस्तु
॥कीदृशाय आयुधाय अनातताय धनुषि संधानाभावादप्रसारि
ताय। धृष्णवे स्वरूपेण प्रहर्तुं प्रगल्भाय किंच। तेत्वदीयाभ्यां उभाभ्यां
बाहुभ्यां नमोस्तु तथा तवत्वदीयाय धन्वने नमोस्तु॥ ॥अथ पंचदशी
मृचमाह॥ ॥परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो य इ
षुधिस्तवारे अस्मन्निधेहि तं॥ हेरुद्र तत्वदीयस्य धन्वनः हेतिर्बाणश
स्त्यरूपा अस्मान्विश्वतः परिवृणक्तु वर्जितान्करोतु॥ मी वाधंतामि ८
त्यर्थः॥ अथो अपि च यस्तव इषुधिः तमस्मदारे अस्मत्तो दूरे निधेहि स्था

सर्वतः

पय॥ ॥इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे यजुःसं
हितायां चतुर्थकांडे पंचमप्रपाठके प्रथमोनुवाकः॥ ॥१॥ ॥प्रथ
मेनानुवाकेनक्त तस्य भगवतो रुद्रस्य याः प्रधानभूताः तनुवस्ता अ
ष्टभिरनुवाकैः प्रसाद्यंते। तेषु चानुवाकेषु सर्वाण्यपि यजूंषि तानि
च द्विविधान्युभयतो नमस्कारा — न्यतरतो नमस्काराणि च त्रिष्वनुवा
केषु नमस्कारादिकं नमस्कारांतमेकैकं यजुः इतरेषु पंचस्वनुवाकेषु
नमस्काराणि च त्रिष्वनुवाकेषु नमस्कारादिकं नमस्कारांतमेकैकं
यजुः॥ ॥तत्र द्वितीये नुवाके प्रथम यजुराह॥ ॥नमो हिरण्यबाह

वे सेनान्ये दिशां च पतये नमः॥ ॥हिरण्यनिर्मितानि आभरणानि बाह्वो
र्यस्यासौ हिरण्यबाहुः॥ स च संग्रामेषु सेनां नयतीति सेनानीः तादृशमू
र्त्तिधरो यो रुद्रः तस्मै नमोस्तु। यश्च दिशां च पालको रुद्रस्तस्मै नमोस्तु
॥ ॥द्वितीयं यजुराह॥ ॥नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमः
।इति हरितरूपाः केशाः पर्णरूपा येषां वृक्षाणां ते हरिकेशाः तादृशेभ्यो
वृक्षेभ्यो वृक्षाकाररुद्रमूर्त्तिभ्यो नमोस्तु यो रुद्रः पशूनां पालकस्तस्मै नमो
स्तु॥ ॥तृतीयं यजुराह॥ ॥नमः सस्पिंजराय त्विषीमते पथीनां पतये नम ५
ः॥ ॥सस्पिंछः शष्पं बालतृणं वा पिंजरशब्दः पीतरक्तरक्तः संकीर्णवर्णः पिंजर

ए

बालतृणवत् पिंजरः सस्पिंजरः स त्विषीमान् दीप्तिमान् तथाविधमूर्त्तये
नमोस्तु पथीनां मार्गस्थानां पालकस्तस्मै नमोस्तु॥ ॥अथ चतुर्थं यजुरा
ह॥ ॥नमो बभ्लुशाय विव्याधिनेन्नानां पतये नमः॥ ॥बिभर्त्ति रुद्रमि
ति बभ्लुः वृषभः स एव बभ्लुः तस्मिन् शेते तिष्ठतीति बभ्लुशः स च द्वेषिणो वि
विध्यतीति विव्याधी तथाविधाय नमोस्तु। यश्चान्नानां पालकस्तस्मै न
मोस्तु॥ ॥अथ पंचमं॥ ॥नमो हरिकेशायोपवीतिने पुष्टानां पतये न
मः॥ ॥नीलालकमूर्द्धजाय पलितहरिताय उपवीतिने मंगलार्थं य
ज्ञोपवीतधारिणे रुद्राय नमोस्तु। पुष्टानां परिपूर्णगुणानां पुरुषाणां

पतयेस्वामिनेनमोस्तु॥ ॥अथ षष्ठं॥ ॥नमोनवस्य हेत्यै जगतां
पतयेनमः॥ ॥नवः संसारस्तस्य हेतिः आयुधं तस्मै संसारछेत्रे रु
द्रायनमोस्तु जगतां पालको यो रुद्रस्तस्मै नमोस्तु॥ ॥अथ सप्तमं॥ ॥
नमो रुद्रायाततायिने क्षेत्राणां पालके नमः॥ ॥आततेन विस्फारि
तेन धनुषा अवरतिरस्कृति इत्याततावी तस्मै रुद्रायनमोस्तु॥ क्षेत्रा
णां पालको यो रुद्रस्तस्मै नमोस्तु॥ ॥अथाष्टमं॥ ॥नमः सूताया हंत्या
य वनानां पतयेनमः॥ ॥सूतः सारथिः अहंत्यो वैरिनिर्हंतुमशक्यः १०
तादृशाय रुद्राय नमोस्तु यो वनानां पालकस्तस्मै रुद्रायनमोस्तु॥

॥अथ नवमं॥ ॥नमो रोहिताय स्थपतये वृक्षाणां पतये नमः॥ ॥
रोहितो लोहितवर्णः स्थपतिः प्रभुः तस्मै रुद्रायनमोस्तु॥ वृक्षाणां पालकः
तस्मै रुद्रायनमोस्तु॥ ॥अथ दशमं॥ ॥नमो मंत्रिणे वाणिजाय कक्षाणां
पतयेनमः॥ ॥राजसभायां मंत्रालोचनकुशलो मंत्री स च वणिजां स्वामि
त्वेन वाणिजः तस्मै रुद्रायनमोस्तु वनगता गुल्मादयः तेषां पालकायनमो
स्तु॥ ॥अथैकादशं॥ ॥नमो भुवंतये वारिवस्कृतायौषधीनां पतये नमः॥
भुवं तनोति भुवंतिः वरिवो धनं तस्य कर्ता वरिवस्कृत वरिवस्कृदेव वारि
वस्कृतः॥ तस्मै रुद्रायनमो अस्तु॥ ॥ओषधीनां ग्राम्यारण्यानां पालकायनमो

स्तु॥ ॥अथद्वादशं॥ ॥नम उच्चैर्घोषायाक्रंदयते पत्तीनां पतयेनम
:॥ ॥युद्धकालउच्छ्रितो घोषो ध्वनिर्यस्यासौ उच्चैर्घोषः आक्रंदयते वै
रिणं रोदयिता तस्मै रुद्राय नमोस्तु पादचारिणो योधाः पत्तिशब्दवाच्या
:तेषां पालकाय नमोस्तु॥ ॥अथत्रयोदशं॥ ॥नमः कृत्स्नवीताय धावते
सत्वनां पतये नमः॥ ॥कृत्स्नं वा तं चेष्टितं येनासौ कृत्स्नवीतः पलायमा
नां परकीयसैन्यानां पृष्ठतो गच्छन् धावन् तस्मै रुद्राय नमोस्तु॥ ॥इति
द्वितीयोऽनुवाकः॥ ॥इति द्वितीयानुवाके नमस्काराणि कानिचिद्यजूं ११
ष्यकानि अथापराणि तथाविधान्येव तृतीये कानिचिद्यजूंष्युच्यंते॥ त

त्र प्रथमं यजुराह॥ ॥नमः सहमानाय निव्याधिन आव्याधिनीनां पत
येनम इति॥ ॥सहमानो विरोधिनो तिनवः नितरां विरोधिनो विध्य
तीति निव्याधिना दृशाय रुद्राय नमोस्तु॥ आसमंताद्विध्यंतीति आव्याधिन्य
श्शूराः सेनाः तासां पालकाय नमः॥ ॥द्वितीयं यजुराह॥ ॥नमः ककुभा
य निषंगिणे स्तेनानां पतये नम इति॥ ॥ककुभाय ककुप् सदृशाय प्र
धानभूतायेत्यर्थः॥ निषंगिणे निषंगी खड्ग इस्तस्मै नमः स्तेनाः गुप्तःचोराः चौ
स्तेषां पालकाय नमः॥ रुद्रो ह्रि लिलयानट इव नानावेषं धत्ते॥ यद्वा तं सस
र्वजगदात्मकत्वाद्योय थाप्रवर्त्तते तत्र तथा तद्रूपेण स्वरूपेण च॥ तत्र

यज्ञीवरूपं तत्स्तेनादिशब्दानां वाच्योर्थस एव शास्त्रेषु निंद्यः॥ यत्तु ईश्व
ररूपं तत्स्तेनादिशब्दै रुपलक्ष्यते। तदनुसंधानं तु पापक्षयहेतुत्वे
न परमपुरुषार्थ इति॥ लक्ष्यार्थविवक्षायां मंत्रेषु लौकिकाः शब्दाः प्रयु
ज्यंत इति द्रष्टव्यं॥ उपलक्षकवाच्यार्थद्वारेण लक्ष्योर्थो मुग्धैरपि सम्यक्
बोद्धुं शक्यते॥ यथा शाखाग्रे चंद्र इत्यत्र तस्माल्लक्ष्यार्थस्यैव विवक्षायाम
पि सुखावबोधद्वारत्वेन मुख्यार्थवाचकाः शब्दाः प्रयोक्तव्याः॥ ॥अथ तृ
तीयं यजुराह॥ ॥नमो निषंगिण इषुधिमते तस्कराणां पतये नम इ १२
ति॥ ॥धनुषि संधातुं हस्ते धृतो बाणो निषंगः॥ इष्टेवद्धो बाणधार इ

षुधिः तदुभययुक्ताय नमः॥ तस्कराः प्रकटचोराः तेषां पालकाय
नमः॥ ॥चतुर्थं यजुराह॥ ॥नमो वंचते परिवंचते स्तायूनां पत
ये नम इति॥ ॥स्वामिनश्चाप्तो भूत्वा तदीयक्रयविक्रयादिव्यव
हारेषु यत्र क्वापि यत्किंचिद्द्रव्यापह्नवो वंचनं॥ सर्वेष्वपि व्यवहा
रेष्वपह्नवः परिवंचनं। तदुभयरूपाय नमः॥ गुप्तचोराः द्विविधाः इ
रादागत्य रात्रावज्ञाताः संतः कपाटाद्युद्घाटनेन ये द्रव्यापहर्तारस्ते
नाः स्वकीया एव भूत्वा रात्रावहनि वाऽज्ञैरज्ञाताः संतो हर्तारो ये ते
स्तायवः तेषां पालकाय नमः॥ ॥अथ पंचमं यजुराह॥ ॥नमो निचे

रवेपरिचराचारण्यानांपतयेनमइति॥ ॥स्वामिष्टइएवकदाप
रिहरिष्यामिइ।त्यनयाबुध्यासावधानोनिरंतरंचरशीलोनिचेरुः
परितश्चापणवीथीप्रवाटिकादावपहारबुध्यापरिचरः।तद्रूय
रूपायनमः॥मार्गेगंतॄन्द्रव्यापहाररूपेणबाधितुंनिरंतरमरण्ये
वर्तमानाश्चोराश्चारण्यास्तेषांपालकायनमः॥ ॥षष्ठंयजुराद॥
॥नमःसृकाविभ्योजिघांसद्भ्योमुष्णतांपतयेनमइति॥ ॥सृके
शब्दोवज्रवाचीतेनस्वशरीरंरक्षवंतिरक्षंतीतिसृकाविनः॥प्राणिनो १३
हंतुमिच्छंतश्चोराजिघांसंतस्तद्रूयरूपायनमः।कृषिकाःसंतः

स्वामिधान्यापहर्तारोमुष्णंतस्तेषांपालकायनमः॥ ॥सप्तमंयजु
राद॥ ॥नमोसिमद्भ्योनक्तंचरद्भ्यःप्रकृंतानांपतयेनमइति॥ ॥
असिमंतःखड्गधारिणोयेरात्रौचरंतोवीथ्यानिर्गतान्प्राणिनोबाध
मानाश्चोराः।नक्तंचरंतःतद्रूयरूपायनमः॥हत्वैवापहरंतःप्रकृं
तास्तेषांपालकायनमः॥ ॥अष्टमंयजुराद॥ ॥नमउष्णीषिणेगिरिच
रायकुलुंचानांपतयेनमइति॥ ॥शिरोवेष्टनवानुष्णीषीग्रामजन
वत्उष्णीषेणशिरोवेष्टयित्वातन्मध्येप्रविश्यवर्तमानश्चोरउष्णीषी।
गिरौकाष्ठादिसंपादकानांवस्त्रादिकमपहर्तुंचरतीतिगिरिचरःतद्रू

यरूपाय नमः॥ कुंभूमिं गृह्णन्ते तद्रूपां लुंचंति अपहरंतीति कुलुंचास्ते
षां पालकाय नमः॥ ॥अथ नवमं यजुराह॥ ॥नमः इषुमद्भ्यो ध
न्वाविभ्यश्च वो नमः॥ ॥नीषयितुं हस्ते बाण धारिणः इषुमंतः। तथा नी
षयितुं हस्ते धनुर्धारिणः धन्वाविनः॥ तदुभयरूपाः हे रुद्राः वः युष्मभ्यं
नम इति॥ विशेषणद्वयेन मंत्रवाक्यं नेतुं द्विर्नमस्कारः॥ ॥दशमं यजु
राह॥ ॥नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नम इति॥ ॥धनु
षि ज्यामारोपयंतः आतन्वानाः। तद्रूपेभ्यो वो युष्मभ्यं रुद्रेभ्यो नमः। ध १४
नुषि बाणं संदधानाः प्रतिदधानाः तद्रूपेभ्यो वो युष्मभ्यं नमः॥ ॥अथै

कादशं यजुराह॥ ॥नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमः॥ ॥ज्याक
र्षणं कुर्वंत आयच्छंतः। बाणं मुंचंतो विसृजंतः। शेषं पूर्ववद्व्याख्येयं॥
॥ द्वादशं यजुराह॥ ॥नमोस्यद्भ्यो विध्यद्भ्यश्च वो नम इति॥ ॥मुक्त
बाणस्य लक्ष्यपर्यंतगमनं असनं तस्य कर्तारो स्यंतः लक्ष्यसमीपंगत
रु॰भा॰ स्य लक्ष्ये प्रवेशो वेधः तस्य कर्तारो विध्यंतः॥ ॥अथ त्रयोदशं यजु
रारभ्य सप्तदशयजुः पर्यंतानि विस्पष्टार्थान्याह॥ ॥नम आसीनेभ्यः
शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः तिष्ठद्भ्यो
धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो अश्वेभ्यो श्व

पतिभ्यश्च वो नमः ॥ ॥ इति सायणाचार्यविरचिते माधवीये वेदार्थ
प्रकाशे यजुःसंहितायां चतुर्थकांडे पंचमप्रपाठके तृतीयोनुवाकः ॥
॥ ॥ तृतीयेनुवाके यान्युन्नयतो नमस्काराणि यजूंष्युक्तानि तेभ्यो
न्यानि कानि चिदुन्नयतो नमस्काराणि यजूंषि चतुर्थे निधीयंते ॥ ॥
तत्र प्रथमं यजुराह ॥ ॥ नम आव्याधिनीभ्यो विविध्यंतीभ्यश्च वो न
मइति ॥ ॥ आसमंताद्वेद्धुं शक्ताः स्त्रीमूर्तयः आव्याधिन्यः विशेषेण वेद्धुं
शक्ता विविध्यंतः ॥ ॥ द्वितीयं यजुराह ॥ ॥ नम उगणाभ्यः स्तृंहती २५
भ्यश्च वो नमइति ॥ ॥ उत्कृष्टगणरूपाः सममातृकाद्याः स्त्रिय उगणाः

हिंसितुं समर्थाः दुर्गाद्याः दुर्गादेवताः स्तृंहत्यः ॥ ॥ तृतीयं यजुरा
ह ॥ ॥ नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमइति ॥ ॥ गर्धन
शीलाः । गृत्सा विषयलंपटा इत्यर्थाः तेषां पालका गृत्साः विषयलंप
टा इत्यर्थः तेषां पालका गृत्सपतयः ॥ ॥ चतुर्थं यजुराह ॥ ॥ नमो
व्रातेभ्यो व्रातपतिभ्यश्च वो नमइति ॥ ॥ नानाजातीयानां संघा व्राताः
तेषां पालका व्रातपतयः ॥ ॥ पंचमं यजुराह ॥ ॥ नमो गणेभ्यो गण
पतिभ्यश्च वो नमइति ॥ ॥ देवस्यानुचरा भूतविशेषा गणाः तेषां पा
लका गणपतयः ॥ ॥ षष्ठं यजुराह ॥ ॥ नमो विरूपेभ्यो विश्वरूपेभ्य

श्चवो नम इति ॥ ॥ देवस्यानुचरा ॥ विरूपा विकृतरूपा नग्नमुंडादयः
विश्वरूपास्तुरगगजवक्त्रादिनानारूपधारिणो भृत्याः ॥ ॥ सप्तमं यजु
राड् ॥ ॥ नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नम इति ॥ ॥ अणिमाद्यैश्वर्यो
८ पेता महांतः तद्रहिताः क्षुल्लकाः ॥ ॥ अष्टमं यजुराड् ॥ ॥ नमो रथिभ्यो
ऽरथेभ्यश्च वो नम इति ॥ ॥ रथमारूढा रथिनः तद्रहिता अरथाः ॥ ॥ ८
नवमं यजुराड् ॥ ॥ नमो रथेभ्यो रथपतिभ्यश्च वो नम इति स्पष्टार्थः ॥ ॥ अथ
दशमं यजुराड् ॥ ॥ तथा च सप्तदशपर्यंतानि स्पष्टार्थानि यजूंषि आह ॥ २६
नमः सेनाभ्यः सेनानिभ्यश्च वो नमः क्षत्तृभ्यः संस्तक्षभ्यो रथकारेभ्यश्च

वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुंजिष्टेभ्यो नि
षादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयु
भ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नम इति ॥ ॥
पक्षिपुंजानां घातकाः पुंजिष्टाः मत्स्यघातिनो निषादाः श्वानगले
बद्धानां पाशानां धारकाः श्वनयः ॥ अत्र द्वितीयोऽनुवाको लीलार्थदेवा
नां मूर्त्तिप्राधान्येन प्रवृत्तः ॥ तृतीयोऽनुवाकश्चोरमूर्त्तिप्राधान्येन चतु
र्थोऽनुवाको नानाजातिप्राधान्येनेति विभागो द्रष्टव्यः ॥ ॥ इति सा
य० चतुर्थकांडे पंचमप्रपाठके चतुर्थेऽनुवाके उभयतो नमस्कारा

णि यजूंषि समापितानि॥ ॥अथ पंचममारभ्य आनवमं तेषु अ
नुवाकेषु नमस्कारोपक्रमाण्येव यजूंष्याम्नायंते॥ तत्र पंचमानु
वाके प्रथमं यजुरारभ्य पंचदशयजूंष्याह॥ ॥नमो भवाय च
रुद्राय चेत्यारभ्य नमः स्रोतस्याय च द्वीप्याय चेत्यंतानि पंचदशय
जूंषि तेषामर्थः॥ कथ्यते॥ भवंति प्राणिनोस्मादिति भवः।रुद्रो रोदन
हेतुः नूनं दुःखं द्रावयतीति रुद्रः शृणाति हिनस्ति पापमिति शर्वः॥
पशुसमानानज्ञानिनः पुरुषान् पालयतीति पशुपतिः।कालकूटधा
रणेन नीलवर्णा ग्रीवैकदेशो यस्यासौ नीलग्रीवः॥ शितिः श्वेतवर्णः २१

अवशिष्टकंठप्रदेशो यस्यासौ शितिकंठः। कपर्दो जटाजूटो स्यास्ति
इति कपर्दी। मुंडितकेशो व्युप्तकेशः पाशुपतादिवेषेण कपर्दित्वं य
त्यादिवेषेण मुंडितकेशत्वं। इंद्रवेषेण सहस्राक्षत्वं सहस्रभुजाव
तारेण शतसंख्याकधनुर्निरूपेन त्वं गिरौ कैलासे शेते तिष्ठतीति गि
रिशः। विष्णुमूर्त्तिधारी शिपिविष्टः॥ विष्णुः शिपिविष्ट इति श्रुतेः। मेघरू
पेणात्यंतवर्षयिता मीढुष्टमः बाणधार इषुमान्। शरीरे अल्पप्र
माणत्वं ह्रस्वत्वं॥ अंगुल्याद्यवयवसंकोचो वामनत्वं आकारेण प्रौढो
बृहत॥ गुणैः संवृद्धो वर्षीयान् वयसाधिको वृद्धः सम्यक् स्तुतिनिर्वद्धि

को

तः संवृद्धा ॥ जगदुत्पत्तेः पूर्वमवस्थितोऽग्रियः । सभायां मुख्यः प्रथमः
। आशुर्व्यापी । अजिरो गमनकुशलः । शीघ्रियः शीघ्रगामी ॥ शीभशब्द उ
दकप्रवाहवाची ॥ तत्रावस्थितो शीभ्यः । ऊर्मिस्तरंगैरन्वित ऊर्म्यः । अवसा
ने ध्वनिरहितस्थिरजलस्थितः अवस्वन्यः । स्रोतसि प्रवाहे स्थितः स्रोत
स्यः । द्वीपे मध्यवर्तिभूमौ स्थितो द्वीप्यः ॥ अत्रैकस्मिन्यजुषि चत्वार्य्येतान्यां
पदान्यां नमशब्दं पृथगन्वेतुं समुच्चयार्थौ चकारौ पठितौ ॥ ॥ इति
पंचमोऽनुवाकः ॥ ॥ पंचमेऽनुवाके कानिचिदन्यरैतेरो नमस्का
राणि यजूंष्युक्तानि । अथ षष्ठे तथाविधान्येवान्यानि कानिचिद्यजूं १८

ष्याह ॥ ॥ नमो ज्येष्ठाय च कनिष्ठाय चेत्यारभ्य नमः श्रुताय च श्रुत
सेनाय चेत्यंतं ॥ ॥ विद्यैश्वर्यादिभिरधिको ज्येष्ठः तैरहितोऽल्पः कनि
ष्ठः ॥ पूर्वं जगदादौ हिरण्यगर्भरूपेणोत्पन्नो पूर्वजः ॥ अपरस्मिन्ज
गदवसानकाले संहर्तुकालाग्न्यादिरूपेणोत्पन्नोऽपरजः ॥ स्थितिका
ले विष्णुरूपेणोत्पन्नो मध्यमः ॥ अपगल्भोऽप्ररूढेंद्रियो बालः । जघ
ने गवादीनां पश्चाद्भागे वत्सादिरूपेण भवो जघन्यः । बुध्नो वृक्षादीनां
मूले शाखादिरूपेणोत्पन्नो बुध्नियः । उभाभ्यां पुण्यपापाभ्यां सह व
र्तत इति सोभो मनुष्यलोकः ॥ अत एवाथर्वणिका आमनंति ॥ पु

एयेन पुण्यं लोकं जयति पापेन पापं उभाभ्यामेव मनुष्यलोकमि
ति तत्र भवः। सोभ्यः। प्रतिसरो विवाहादौ हस्ते धार्यमाणो बंधस्तमर्हती
ति धान्यविशेषरूपेण प्रतिसर्यः। यमलोके पापिशिक्षकरूपेण भ
वो याम्यः। क्षेमो मोक्षः तमर्हतीति क्षेम्यः। उर्वरा सर्वसस्याढ्या भूमि
स्तामर्हतीति धान्यविशेषरूपेण उर्वर्यः। खलो धान्यविवेचनदेशः तम
र्हति मेढ्यादिरूपेणेति खल्यः॥ श्लोकाः वैदिकमंत्राः तत्प्रतिपाद्यत्वेन त
त्र भवः श्लोक्यः। अवसानं वेदांताः। तत्प्रतिपाद्यत्वेन तत्र भवो ऽवसान्यः। व २८
ने वृक्षादिरूपेण भवो वन्यः कक्षे लतादिरूपेण भवः कक्ष्यः। श्रूयत इ

ति श्रवः शब्दः प्रतिश्रवः प्रतिध्वनिः। आशुः शीघ्रगामिनी सेना यस्यासा
वाशुषेणः। आशुः शीघ्रगामी रथो यस्यासावाशुरथः। शूरो युद्धे धैर्य
वान्॥ अवभिंदन् वैरिणां प्रहर्ता वर्मी कंचुकोपेतः। वरूथी गृहोपेतः
बिल्मं बिलोपेतं युद्धे शिरोरक्षकं तदस्यास्तीति बिल्मि कवचं शरीररक्ष
कं तदस्यास्तीति कवची श्रुतो वेदेषु प्रसिद्धः श्रुता वेदेषु प्रसिद्धा सेना य
स्यासौ श्रुतसेनः॥ ॥इति षष्ठोनुवाकः॥ ॥षष्ठेनुवाके यान्यन्यत
रतो नमस्काराणि यजूंषि उक्तानि तेभ्योन्यानि सप्तमे तत्र विद्यमानानि
षोडश यजूंष्याह॥ ॥नमो दुंदुभ्याय चाहनन्याय च नमो धृष्ण

वे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषंगिणे चेषुधीम
ते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च नमः
स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च सूद्याय च सरस्याय च
नमो नाद्याय च वैशंताय च नमः कूप्याय चावट्याय च नमो वर्ष्याय
चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चातप्याय
च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥ ॥
दुंदुभ्यां भेर्यां भवः शब्दो दुंदुभ्यः । आहन्यते ताड्यते अनेनेत्याहन
नं दुंदुभ्याघातार्थो दंडः तत्र ताडनरूपेणोत्पन्नः आहनन्यः धृष्णु २०

युद्धे पलायनरहितः प्रमृशः परसैन्यवृत्तांतपरामर्शकः दूतस्तद्वृ
त्तांतज्ञापनकुशलः प्रहितः स्वामिना प्रेषितः पुरुषः निषंगी खड्गयु
क्तः इषुधिमान् पृष्ठबद्धबाणाधारवान् ॥ तीक्ष्णा इषवो यस्यासौ ती
क्ष्णेषुः ॥ बहून्यायुधानि यस्य स आयुधी शोभनमायुधं त्रिशूलरू
पं यस्यासौ स्वायुधः ॥ शोभनं धनुः पीनाकरूपं यस्यासौ सुधन्वा स्रु
तिः पादसंचारमात्रयोग्यः क्षुद्रमार्गः तमर्हतीति स्रुत्यः पंथाः पद
रथाश्वादिसंचारक्षमः प्रौढो मार्गस्तमर्हतीति पथ्यः ॥ कुत्सितमटति
जलमात्रेति काटोऽल्पप्रवाहयोग्यः कुल्याप्रदेशस्तत्र जलरूपेण भवः

काट्याः यस्मिन् प्रदेशे पर्वतायाज्जलं न्यग्भावेन पतति स प्रदेशो नीपः
तस्मै इति तत्र जलरूपेणावस्थितो नीप्यः सूदः कर्दमप्रदेशस्तत्र ज-
लरूपः सूद्यः सरः प्रसिद्धं तत्रत्यजलरूपः सरस्यः नदीगतजलरूपो ना-
द्यः ॥ अल्पसरो वैशंतः तत्रत्यजलरूपो वैशंतः कूपगतजलरूपः कूप्यो
ऽवटगतजलरूपोऽवट्यः वर्षजलरूपो वर्ष्यः वर्षनिरपेक्षः समुद्रादिजल-
रूपोऽवर्ष्यः मेघेषु स्थितो मेघ्यः विद्युत्तासहचरो विद्युत्यः ईध्रं निर्मलत्वेन
दीप्यमानं शरदभ्रं तत्र भवः ईध्रियः आतपेन सह वृष्टिरातप्यः वातेन २२
सह वर्षः वात्यः रिष्यंति विनश्यंति भूतान्यत्रेति रेष्मः प्रलयकालस्तत्र

भवः शर्करापाषाणादिसहितो वर्षजलविशेषो रेष्मियः ॥ वस्तु धनं
गवाश्वादिपदार्थरूपं तत्र तत्कार्यरूपेणावस्थितो वास्तव्यः यन्निर्मा-
णार्था भूमिः वास्तु तत्पालको वास्तुपः ॥ ॥ इति सप्तमोनुवाकः ॥ ॥
॥ सप्तमेनुवाके यानि यजूंषि अन्यतरतो नमस्काराण्युक्तानि तेभ्योन्या-
नि कानिचिदन्यतरतो नमस्काराण्यष्टमेनुवाके कथ्यंते ॥ तत्र विद्य-
मानानि सप्तदशयजूंषि स्याहु ॥ ॥ नमः सोमाय चेत्यारभ्य नमः
सिकत्याय च प्रवाह्याय चेत्यंतं ॥ ॥ उमया सहितः सोमः रुद्रं
रोदनहेतुदुःखं द्रावयतीति रुद्रः आदित्यरूपेणोदयकाले त्वं

पि

तेरकः स्वामी। उदयाद्‌र्ध्वईषद्रक्तोरुणः शं सुखं गमयति प्रापयती
तिशंगः पशूनां पालयिता पशुपतिः विरोधिनाशयितुं क्रोधयुक्त उग्रः द
र्शनमात्रेण विरोधिनां भयहेतुः भीमः अग्रे पुरतो वधोस्येत्यग्रेवधः
स्वस्मात् दूरे वधोऽस्येति दूरेवधः पुरो वा वर्त्तमानं विरोधिनमनाया ८२५
सेनैव हंतीत्यर्थः॥ लोके पियो यत्र विरोधिनं हंति तत्र तद्रूपेणायमे
व हंता। अत एव ईश्वरेणार्जुनं प्रत्युक्तं। मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन्निति। संहारकाले अतिशयेन च सर्वेषां
हंतारी यातन। हरितवर्णानि केशसदृशानि पर्णानि येषां ते हरिकेशाः २२

।तथाविधा ये वृक्षाः कल्पतरुप्रभृतयः। तद्रूपोयं रुद्र इत्यर्थः। तारः
प्रणवप्रतिपाद्यः। शं सुखं भावयत्युत्पादयतीति शंभुः मयः सुखं भा
वयतीति मयोभूः। कं विषयसुखं अपरं मोक्षं इति तयोर्विवेकः पित्रा
दिरूपेण शं लौकिकं सुखं करोतीति शंकरः॥ आचार्यशास्त्रादिरूपेण
मयो मोक्षसुखं करोतीति मयस्करः साक्षात्सुखकारित्वमेताभ्यां पदा
भ्यां मुक्तमेव सुखकारयितृत्वं पूर्वाभ्यां पदाभ्यामिति विवेकः। शिवक
ल्याणरूपः स्वयं निष्कल्मष इत्यर्थः। अतिशयेन शिव इति शिवतरः
।स्वभक्तानपि निष्कल्मषान्करोति इत्यर्थः। तीर्थे प्रयागादौ सन्निहितः स्त्री

र्थः॥कूलेनदीतीरे प्रतिष्ठापितलिंगरूपेणावतिष्ठत इति कूल्यः।पा
रे संसारसमुद्रस्य परतीँमुमुक्षुनिर्ध्येयत्वेनावतिष्ठत इति पार्यः॥अवारे
अर्वाक्‌संसारमध्ये काम्यफलप्रदनावतिष्ठत इत्यापार्यः।प्रकृष्टेनमंत्र
जपध्यानादिना पापतरणहेतुः प्रतरणः।उत्कृष्टेनकृच्छ्रचांद्रायणादिना
तपसा पापतरहेतुः उत्तरणः।आसमंतात्‌ सर्वत्रतत्कांतारपतिरित्या
तार्यः।अलंसंपूर्णं यथा न वति तथा कर्मफलमत्ति इत्यलादो जीवः।तयोर
न्यः पिप्पलं स्वाद्वत्तीति श्रुतेः।तस्य प्रेरकत्वेन आलाद्यः बालतृणं गंगाती
रादौ उत्पन्नं कुशांकुरादि तदर्हतीति शष्प्यः॥नदीमध्यगतं फेनमर्हतीति २३

फेन्यः।सिकतामर्हतीति सिकत्यः॥प्रवाहमर्हतीति प्रवाह्यः।यः पुरु
षः श्रद्धालुं मनुस्नानादितत्परो निरंतरं गंगातीरे वर्त्तते तेन रूप इति श
ब्यादिशब्दानां चतुर्णां तात्पर्यार्थः॥ ॥इत्यष्टमोऽनुवाकः॥ ॥
अष्टमेनुवाके यान्यन्यतरतोनमनमस्काराणि यजूंष्युक्तानि तेभ्यो
प्यन्यूनानि कानिचिन्नवमेनुवाके उच्यते॥ ॥तत्र विद्यमानान्येको
नाविंशतिसंख्याकानि यजूंष्याह॥ ॥नम इरिण्याचैयत्यारभ्य
नम आमीवत्केभ्यो देवानां हृदयेभ्य इत्यंतानि यजूंषि॥ ॥इरि
णं ऊखरं तत्र भव इरिण्यः प्रपथो बहुभिः सेवितो मार्गस्तत्र भवः प्रप

ग्व्यः । कुत्सिताः क्षुद्राः शिलाप्रदेशे तादृशः शार्करिलः प्रदेशः किंशिलः
क्षयणे निवासयोग्यो देशः कपर्दी जटाबंधवान् भक्तानां पुरस्तिष्ठतीति
पुलस्तिः गवांस्थानं गोष्ठं तत्र भवो गोष्ठ्यः । गृहे भवो गृह्यः । तल्पे खट्वायां
शेते स तल्प्यः । गेहे प्रासादे भवो गेह्यः । कुत्सितमटति कंटकितलतादि
पूर्णतया दुःप्रवेशत्वं प्राप्नोतीति दुर्गमारण्यविशेषः काटः तत्र भवः का
ट्यः । गह्वरे विषमे गिरिगुहादौ तिष्ठतीति गह्वरेष्टः ह्रदे गाधजले भवो
ह्रदय्यः । निवेष्प्यं नीहाररजलं तत्र भवो निवेष्प्यः । पांसुषु परमाणुष्व २८
वस्थितः पांसव्यः । रजसि विस्पष्टायां धूल्यामवस्थितो रजस्यः । शुष्केषु

काष्ठेषु भवः शुष्क्यः हरितमार्द्रं तत्र भवो हरित्यः । लुप्यते तृणादिकं
यस्मिन्निति लोपः कठिनप्रदेशः तत्र भवो लोप्यः उलपा बल्वजाख्यतृ
णादयस्तत्र भवो उलप्यः ॥ उर्व्यां पृथिव्यां भव ऊर्व्यः शोभनाऊर्मयो य
स्यां नद्यां सेयं सूर्मिस्तत्र भवः सूर्म्यः । पर्णेषु पत्रेषु भवः पर्ण्यः शुष्काणां
पर्णानां संघातः पर्णशत् तत्र भवः पर्णशद्यः । अपगुरमाण उद्यतायुधः
। अभिघ्नन् प्रहरन् आक्खिदत ईषत् खेदयत ॥ प्रक्खिदत् अत्यंतं खे
दयत ॥ किरंति निक्षेपयंति धनानीति किरिकाः उदारा रुद्रावतारास्ते च दे
वानां हृदयभूताः सर्वदेवप्रियत्वात् तादृशेभ्यो वो युष्मभ्यं नमः । क्षीणे

न्यो विपरीता विक्षीणकाः कदाचिदपि क्षयरहिता इत्यर्थः॥ विचिन्वं
त्यपेक्षितमर्थं संपादयंतीति विचिन्वत्काः॥ आसमंतान्निःशेषेण ह
तं पापं येस्ते आनिर्हताः॥ आसमंतान्मीवंति व्याप्नुवंतीति आमीवत्काः॥
पंचमानुवाकमारभ्य नवमांतेष्वनुवाकेष्वन्यतरतो नमस्काराणि
बहूनि यजूंष्याम्नातानि तैः सर्वं परमेश्वरस्य सर्वात्म्यं प्रतिपाद
यितुमेकैकेन यजुषा स्थावरजंगमं चैकैकं रूपमभिहितं॥ अनुवा
कभेदस्तु कर्तोर्बहिः प्रयोगे मंत्रभेदाभिप्रायेण द्रष्टव्यः॥ एकैकोनुवा
क एकैको मंत्रस्तस्य पुरश्चरणादिप्रकारस्तु रुद्रकल्पे निधास्यते॥ ॥ २५

॥ ॥इति नवमोऽनुवाकः॥ ॥द्वितीयमारभ्य नवमांतेष्वनुवाके
ष्वविविधानि यजूंष्युभयतो नमस्काराणि अन्यतरतो नमस्काराणि
चोक्तानि॥ अथ दशमेनुवाके ऋग्रूपा मंत्रा उच्यंते॥ तत्र प्रथमामृ
चमाह॥ ॥द्रापे अंधसस्पते दरिद्रं नीललोहित॥ एषां पुरुषा
णामेषां पशूनां मा भेर्मारो मो एषां किंचनाममत्॥ ॥द्रापयति कु
त्सितां गतिं प्रापयतीति द्रापिः॥ पापिनो नरकप्रदानेन क्लेशयतीत्य
र्थः॥ अंधोन्नं तस्य पतिः पालकः भक्तानामन्नं पालयतीत्यर्थः॥ द
रिद्र त्वमकिंचनः स्वयं विरक्तः केवल इत्यर्थः॥ एकमेवाद्वितीयं ब्र

ना।

स्मनेह नानास्ति किंचन इति श्रुतेः। कंठे नीलोन्यत्र लोहित इति नीललोहि
तः एतैः शब्दैः संबोध्यमान हे रुद्र एषामस्मदीयानां पुरुषाणां पुत्र
पौत्रादिनामेषामस्मदीयानां पशूनां गोमहिष्यादीनां च समृद्धं मा नेः
मानीषय। एषामुक्तानां सर्वेषां मध्ये किंचन किमपि वस्तु मारः मागच्छ
तु मा विनश्यतीत्यर्थः। मो ग्राम मरत्। मैव रुग्णं न्नृत्॥ ॥अथ द्वितीया
मृचमाह॥ ॥या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी। शिवा रुद्र
स्य भेषजी तया नो मृड जीवसे। इति॥ ॥हे रुद्र त्वदीया शिवा शांता तनू २६
र्या विद्यते तया तन्वा नोस्मान् जीवसे जीवयितुं मृडय सुखय कथं तन्वाः

शिवत्वमिति तदुच्यते यस्माद्देवं विश्वाह भेषजी सर्वेष्वहःसु रोग
हा। रिष्यादेरौषधवद्विनाशहेतुस्तस्माच्छिवा किंच यस्माद्रुद्रस्य
तादात्म्याभये भेषजी औषधरूपज्ञानप्रदानेन जन्ममरणादिदुःखं
निवारयति तस्माद्ध्येषा शिवा॥ ॥अथ तृतीयामाह॥ ॥इमा रु
द्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिं। यथा नः शमस
द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरं॥ ॥यथा येन प्रका
रेण नोस्मदीयाय द्विपदे पुत्रपौत्रादिरूपाय मनुष्याय चतुष्पदे गोमहि
ष्यादिरूपाय पशवे च शमसत्सुखं स्यात्॥ किंचास्मिन् ग्रामे विश्वं सर्वं

घ्राणिजातं पुष्टं सुखं प्रर्णमनातुरमुपद्रवरहितं च यथा नवति तथा
वयं रुद्राय रुद्रार्थे इमां मतिं ज्ञानध्यानादिविषयां बुद्धिं प्रभरामहे प्र
कर्षेण पोषयामः कीदृशाय रुद्राय तवसे बलयुक्ताय अस्मदपेक्षितं क
र्तुं समर्थायेत्यर्थः कपर्दिने जटाबंधयुक्ताय तापसवेशायेत्यर्थः। क्षयद्वी
राय क्षीयमाणप्रतिपक्षि पुरुषाय अन्यथा नानारूपमायाविनाशहेत
वे इत्यर्थः॥ ॥अथ चतुर्थीमाह॥ ॥मृडा नो रुद्रोत नो मयस्कृधि क्ष
यद्वीराय नमसा विधेम ते। यच्छं च योश्च मनुरायजे पिता तदश्याम तव रु २७
द्रप्रणीताविति॥ ॥हे रुद्र नोऽस्मान् मृडय इहलोके सुखय। उत अ

पि च नोऽस्माकं परलोकेपि मयः सुखं त्वं कुरु। क्षयद्वीराय क्षपितास्म
दीयपापाय ते तुभ्यं नमस्कारेण विधेम परिचरेम पिता पालको मनुः
प्रजापतिः शं सुखं च यो दुःखपृथक्करणं च यदीयजे यत्किंचित्संपादि
तवान् तत्सर्वं वयं हे रुद्र तव प्रणीतौ प्रणये स्नेहातिशये सति अश्या
म प्राप्नुयाम॥ ॥अथ पंचमीमृचमाह॥ ॥मा नो महान्तमुत मा नो अ
र्भकं मा न उक्षन्तमुत मा न उक्षितं। मा नो वधीः पितरं मोत मातरं प्रि
या मा नस्तनुवो रुद्र रीरिषः॥ ॥किं च नोऽस्मदीयं महान्तं पुरुषं स्थविरं
मा रीरिषः। उत अपि च नोऽस्मदीयं उक्षितं गर्भस्थं पुरुषं मा रीरिषः किंच

नोस्मदीयं उक्षितरं मावधीः उत अपि च मातरं मावधीः नोस्मदीयाः प्रि
याश्च तनुवः शरीराणि मारिषः॥ ॥अथ षष्ठीमृचमाह॥ ॥मानस्तो
के तनये मान आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मानो रु
द्र भामितो वधीर्हविष्मंतो नमसा विधेम ते॥ ॥हे रुद्र नोस्मदीये तो
के अपत्यमात्रे तनये विशेषतः पुत्रे मा रीरिषः। हिंसां मा कुरु॥ नोस्म
दीये आयुषि नः अस्मदीयेषु गोषु नः अस्मदीयेषु अश्वेषु मा रीरिषः॥
भामितः क्रुद्धः सन् नोस्मदीयान् वीरान् भृत्यान्मावधीः। वयं हविष्मंतो २८
हविर्युक्ताः संतः त्वां नमसा नमस्कारेण विधेम॥ ॥अथ सप्तमीमाह॥

॥आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु। रक्षा च नो
अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः॥ ॥गोघ्न गोघ्नस्य पुं रु
षघ्ने पुत्रपौत्रादिपुरुषघ्नस्य क्षयद्वीराय क्षपितभृत्याय ते तव यो यत्स्व
रूपं आराद्दूरे तिष्ठतु। यत्सुम्नं त्वदीयं सुखकर रूपं तदस्मे अ
स्तु घोराण्याशिवान्येतियच्छरीरद्वयमुक्तं तयोर्मध्ये यद्घोरं शरीरं तद्दूरे ६
गच्छतु॥ शिवं शरीरं अत्रागच्छत्वित्यर्थः। किंच॥ नोस्मान्रक्ष सर्वतः पालय
किंच हे देव अधिब्रूहि अस्मानितरेभ्यो यजमानेभ्यो अधिकान् देवेषु
ब्रूहि अधा च अपि च द्विबर्हाः। द्वयोर्लोकयोर्वर्धयिता त्वं शर्म यच्छ सुखं देहि॥

॥अथाष्टमीमाह॥ स्तुहि श्रुतं गर्त्तसदं युवानं मृगं न भीममुपहत्नुमुग्रं।
मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्निवपंतु सेनाः॥ ॥हे मदीयंमु
नः वचः। श्रीरुद्रं स्तुहि कीदृशं गर्त्तसदं गर्त्त सहृ शेहृत्पुंडरीके सर्वदा तिष्ठं
तं अभित्वा शूर नोनुमो दुग्धा इव धेनवः ईशानमस्य जगतः। प्रपंचस्य
।ईशावास्यमिदं सर्वं किंचिज्जगत्यां जगत् ईश्वरः सर्वभूतानां हृद्देशेर्जुन ति
ष्ठती तिस्मृतेः॥ युवानं नित्यतरुण्यं तं दुर्दर्शं गूढं गूढं गुहाहितं गह्वरे
ष्ठं पुराणं। सत्यं ज्ञानमनंतं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। उ २९
पहत्नुमुग्रं प्रलयकाले जगत्संहर्त्तुं उग्ररूपधारिणं तत्र दृष्टांतः। भी

मं मृगं न भयंकरं सिंहमिव यथा जंगे विदारणायोग्रः सिंहो भवति॥
नहनृ। हे रुद्र स्तुवानोस्माभिः स्तूयमानो जरित्रे जरणशीले देहे स्तू
यमाणे अस्मच्छरीरे मृड सुखं कुरु ते त्वदीयाः सेनाः अस्मदन्यं वैरिणं नि
वपंतु विनाशयंतु॥ ॥अथ नवमीमाह॥ ॥परि णो रुद्रस्य हेति
र्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः॥ अव स्थिरा मघवद्भ्यस्तनुष्व मी
ढ्वस्तोकाय तनयाय मृडय॥ इति। हन्यते अनयोति हेतिः आयुधं रुद्र
स्य हेतिर्नोस्मान्परिवृणक्तु परितो वर्जितान्करोतु कदाचिदपि मा विध्य
त्वित्यर्थः॥ त्वेषस्य क्रोज्वलितस्य अघायोः अघं पापं प्रदाररूपमिच्छ

धो घं पं

तोरुद्रस्य या दुर्मतिरुग्रबुद्धिः साप्यस्मान्परिवृणक्तु स्थिरा विरोधिवि
नाशनाथया॥ दक्तु दुर्मतिरस्तितां मघवद्भ्यो हविर्लक्षणान्नयुक्तेभ्यो
यजमानेभ्यः सकाशात् अवतनु धअव तर अयनीतां कुरु॥ हे मी
ढुः कामानि वर्षक तोकाय अस्मत्पुत्राय तनयाय मदीयपुत्राय च मृड
य सुखं देहि॥ ॥अथ दशमीमृचमाह॥ ॥मीढुष्टम शिवतम शिवो
नः सुमना भव। आ परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर
पिनाकं बिभ्रदागहि॥ ॥हे मीढुष्टम अतिशयेन सेचक कामानि ३०
वर्षक हे शिवतम अतिशयेन शीतरूप नोऽस्मान्प्रति शिवः शांतः

सुमनाः सौमनस्येन स्नेहेन युक्तश्च भव। आयुधं त्रिशूलादिकं पर
मे अत्युन्नते वृक्षे वटादिवृक्षोपरि निधाय यथास्मानिर्न दृश्य
ते॥ यथावस्थश्च कृत्तिं वसानो व्याघ्रचर्ममात्रं परिदधानः आचर
अस्मदाभिमुख्येनागच्छ आगच्छन् पिनाकं बिभ्रत् भूषणार्थं धनु
मात्रं हस्ते धारयन् बाणादिकं परित्यज्य आगहि आगच्छ॥ ॥अथ
एकादशीमृचमाह॥ ॥विकिरिद्र विलोहित नमस्ते अस्तु भग
वः॥ यास्ते सहस्रं हेतयोऽन्यमस्मन्निवपंतु ताः इति॥ ॥कीर्यंते न
क्नोसन्निधौ बहुधा प्रक्षिप्यंते इति किरयो धानानि तानि ददाति इति

किरदः विशेषेण किरदो विकिरदः विलोहितः श्वेत इत्यर्थः । अ
त एव मांत्रिकाः पंचाक्षरध्याने स्मरंति । ध्येयो मुक्तापरागामृतर
सकलिताद्रिनिभ इति ॥ यद्वा विशेषेण लोहितो विलोहितः अत एवा
ष्टाक्षरध्याने स्मरंति । कांचनाभो ध्येयः पद्मासनस्थ इति भगवः
भगवन् षड्गुणवाचित्वं स्मर्यते ॥ ऐश्वर्यस्य समग्रस्य धर्मस्य यस्य
सः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणेति प्रकारांतरेण भग
वच्छब्दनिर्वचनं । उत्पत्तिं च विनाशं च भूतानामागतिं गतिं ॥ वेत्ति ३२
विद्यामविद्यां च स वाच्यो भगवानिति यथोक्तविशेषणद्वयविशिष्ट

ज्य

न्य

हे रुद्र ते तुभ्यं नमोस्तु ते । तव सहस्रं सहस्रसंख्याका हेतयो यान्य
युधानि संति ताः सर्वा अस्मदन्यं विरोधिनं निवपंतु नाशयंतु ॥ ॥
॥ अथ द्वादशीमृचमाह ॥ ॥ सहस्राणि सहस्रधा बाहुवोस्तव हेत
यः ॥ तासामीशानो भगवः पराचीना मुखा कृधि ॥ ॥ हे रुद्र तव बा
हु ऊँवो हस्तयोर्हेतयः सहस्रधा सहस्रप्रकाराः सहस्राणि सहस्रसंख्या
का विद्यंते धनुःखड्गं त्रिशूलमित्येवं जातिभेदेन सहस्रप्रकारत्वं
एकैकस्या जातौ बहवः सहस्रसंख्याः हे भगवन् षड्गुणोपेत त्वं ईशा
नः समर्थः सन् ॥ तासां हेतीनां मुखा मुखानि शल्यानि पराचीनाः कृधि

अस्मत्तः पराङ्मुखानि कुरु॥ ॥इति दशमोनुवाकः॥ ॥दशमे
नुवाके — रूपाः केचिन्मंत्रा उक्ताः॥ अथैकादशे शिष्टाश्च शिष्टानियजूं
षि चोच्यंते तत्रादौ शसंख्या — चः॥ तासु प्रथमामाह॥ ॥सहस्राणि
सहस्रशो ये रुद्रा अधि भूम्यां। तेषाꣳ सहस्रयोजनेव धन्वानि तन्म
सि॥ ॥भूम्यामधि भूमेरुपरि ये रुद्राः सहस्रशाः सहस्रप्रकाराः
सहस्राणि सहस्रसंख्याकाः संति सहस्रश इति जात्युक्तिः विनायकप्र
थमशैलायोद्ज्ञातिभेदाः सर्वेपि रुद्रविशेषाः तत्राप्येकस्यां ज्ञातौ व
ऽक्तिः सहस्रैः संख्याता मूर्त्तिविशेषाः तेषां सर्वेषां धन्वानि धनूंषि सह ३२

सहस्रयोजनेस्मत्तः सहस्रयोजनव्यवहितदेशे अवतन्मसि अवतत
कानि स्थापय॥ ॥अथ द्वितीयामाह॥ ॥अस्मिन्महत्यर्णवे तरिक्षे भवा
अधि। तेषाꣳ स०॥ अस्मिन्दृश्यमाने महत्यर्णवे महासमुद्रसदृशे प्रौढे त
रिक्षे अधिश्रितवर्त्तमाना भवा रुद्रमूर्त्तिविशेषाः ये संति तेषां सहस्रयोजनइ
त्याद्युक्तार्थं द्वितीयादिनवमांतास्वृक्षु तदनुषंगघोतन्मय दशमीमृचि
पुनः पठितं॥ ॥तृतीयामाह॥ ॥नीलग्रीवाः प्रदेशांतरे श्वेतवर्णाः शि
र्वा अधः क्षमाचराः। तेषाꣳ॥ ग्रीवायामेकस्मिन्प्रदेशे नीलवर्णा नील
ग्रीवाः प्रदेशांतरे श्वेतवर्णाः शितिकंठाः तादृशाः सर्वे रुद्रमूर्त्तिविशेषाः

शितिकंठाशर्वा

अधःक्षमाचराः भूमेरधस्तात्पातालेषु संचरंति तेषामित्यादि पू
र्ववत्॥ ॥चतुर्थीमाह॥ ॥नीलग्रीवाः शितिकंठा दिवं रुद्रा उपश्रि
ताः। तेषां। दिवमुपश्रिताः स्वर्गे वर्त्तमानाः॥ ॥पंचमीमाह॥ ॥ये
वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः। तेषां। यथा लोकेष्ववस्थि
ता रुद्रास्तथा वृक्षेष्वपि स्थितास्तेषु केचित्सस्पिंजराः शष्पवत् बालतृ
णवत् पिंजरवर्णा नीलग्रीवाः किंचित् ग्रीवादेशे नीलवर्णोपेता अप
रे पुनर्विलोहिताः विशेषेण रक्तवर्णाः इदृशा ये संत तेषामित्यादि॥ ॥ ३३
षष्ठीमाह॥ ॥ये भूतानामधिपतयो विशिखासः कपर्द्दिनः। तेषां॥

भूतशब्देनां नर्दितशरीराः संतो मनुष्योपद्रवकारिणो गणविशेषा
उच्यंते तेषामधिपतयो रुद्रास्तेषु केचिद्विशिखासः मुंडितमूर्द्धानः
अपरे कपर्द्दिनो जटाबंधोपेताः तेषामित्यादि॥ ॥सप्तमीमाह॥ ॥
येऽन्नेषु विविध्यंति पात्रेषु पिबतो जनान्॥ ॥ये रुद्राः अन्नेषु भुज्य
मानेषु गूढत्वेनावस्थिताः संतो पिबतो जनान्विविध्यंति तेषामित्या
दि। अथाष्टमीमाह॥ ॥ये पथां पथिरक्षय ऐलबृदायुधः॥ ॥ये रु
द्राः पथिरक्षयो वैश्वदिक मार्गाणां रक्षकाः नात्र केशांचिदेव मार्गाणां
किंतु सर्वेषां यथा रक्षकः॥ ॥ऐलबृदाः इरान्नं तस्य समृद्धये रं ग

रमेव ऐलं तद्विभ्रती निऐलं भृतएवैलंबृदाः अन्नदानेन पोषका
रइत्यर्थः॥ तेचयव्युधः अस्मदनिष्टवायोनी मिश्री नवतिविरो
धंकरोतीयुः शत्रुःशत्रुनिः सहयुध्यंतीतियव्युधः अस्मदनि
निष्टवारकाइत्यर्थः॥ तेषामित्यादि॥ ॥नवमीमाह॥ ॥येतीर्था
निप्रचरंति सृकावंतोनिषंगिणः॥ येरुद्राःतीर्थानि काशीप्रयागा
दिकानि रक्षितुं प्रचरंति कीदृशारुद्राः सृकावंतः सृकाछुरिकाह
स्तेधार्यमाणास्तीक्ष्णाग्राआयुधविशेषास्तद्युक्ताः केचिदपरेनिषं
गिणः खड्गयुक्तास्तेषामित्यादि॥ ॥दशमीमाह॥ ॥यएतावंत ३४

श्चभूयांसश्चदिशोरुद्राविंतस्थिरे। तेषां०॥ ॥येरुद्राएतावं
तश्चसहस्राणिसहस्रशइत्यादिमंत्रैर्यावंतउक्तास्तावंतोपि
भूयांसश्च इतोप्यधिका अन्ये बहवोपिदिशो वितस्थिरे सर्वादिश्य
प्र वि ष्य स्थिताः तेषामित्यादि पूर्ववत्॥ इत्थं दशसंख्याउक्ताः॥ अथ
त्रीणियजूंष्युच्यंते॥ ॥नमोरुद्रेभ्योयेपृथिव्यांयेंतरिक्षे येदिविये
षामन्नंवातोवर्षमिषवस्तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्द
शोदीचीर्दशोर्ध्वास्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोयश्चनोद्वेष्टितं
वोजंभेदधामि॥ ॥अथपृथिव्यादिलोकत्रेदेनोद्दिष्टत्रेदाच्चयजुस्त्र

येद्रष्टव्यं ।तदाएवं पाठः संपद्यते ॥नमोरुद्रेभ्यइत्युपक्रम्य येपृथि
व्यांयेषामन्नमिषवइत्याद्योमंत्रः येंतरिक्षेयेषांवातइषवइतिद्विती
योमंत्रः ॥येदिवियेषां वर्षमिषवइतितृतीयोमंत्रः ॥तेभ्योदशप्राचीरि
तिसर्वमंत्रसमानं ।येरुद्राःपृथिव्यांवर्त्तंते तेष्वपिरुद्रेषुयेषांरुद्रविशेषा
णामन्नेवेषवोबाणाः अपथ्यान्नभक्षणे प्रवर्त्यवाअन्नार्थंचौर्यंकारयि
त्वावायान्हिंसंतितान्प्रतिहिंसकानांरुद्राणामन्नवेषवस्तेभ्यःपृथि
व्यांस्थितेभ्योन्नबाणकेभ्योरुद्रेभ्योनमः ॥तथायेरुद्राअंतरिक्षेवर्त्तंते ३५
तेषामपिमध्येयेषांवातइषवस्तीव्रेणवायुनारोगानुत्पाद्यहिंसंति

तेभ्योंतरिक्षवर्त्तिभ्योवातेषुभ्यश्चरुद्रेभ्योनमोस्तु ॥तथायेरुद्रादिवि
वर्त्तंते तेष्वपियेषांरुद्रविशेषाणां वर्षमेवेषवश्चतिवृष्ट्यनावृष्टिभ्यां
प्राणिनोहिंसंति तेभ्योदिविस्थितेभ्योवर्षेषुभ्यश्चरुद्रेभ्योनमोस्तु
॥कीदृशोनमस्कारइतिसएवविशिष्यते ॥दशप्राचीःप्राङ्मुखेनां
जलिकरणेदशांगुलयःप्रागग्राभवंति ॥एवंदक्षिणादिषूर्ध्वांतेषुयो
ज्यं ।इदशोरंजलिविशेषैरतेभ्योरुद्रेभ्योनमोस्तु ।तेचरुद्रानोस्मानमृ
डयंतुसुखयंतु ॥तेचनमस्कृतरुद्राःसंतोवयंयंवैरिणंद्वल्लीमवस्थि
तमिवद्विष्मःयश्चवैरिनोस्मान्द्वल्लीमवस्थितानपिद्वेष्टितमुनयवि

धं वरिष्ठं इ रुद्राः वो युष्माकं नेविदारितास्येद धामि स्थापयामि। न
मिममेकादशात्मकं रुद्राध्यायं विनियुंक्ते॥ ॥इति श्रीसायणा
चार्यविरचिते माधवीये वेदार्थप्रकाशे यजुःसंहितायां चतुर्थकांडे
पंचमप्रपाठके एकादशोनुवाकः॥ समाप्तः॥ ॥श्री॥ ॥परिषेच
नमुख्यास्तु संस्काराः षष्ठे ईरिताः। वसोर्धारादयः शिष्टाः प्रोच्यंते स्मि
न्नु सप्तमे॥२॥ कल्पः॥ ॥अग्नाविष्णू सजोषसेति चतुर्गृहीतं कृत्वोदुं
बरीं स्रुचं व्याममात्रीं मृदा प्रदुग्धां पश्चादासेचनवतीं घृतस्य पूरयित्वा ३६
वाजश्च मे प्रसवश्च म इति संततां वसोर्धारां जुहोत्यामंत्रसमापनात

दि

इति॥ अत्रत्वेकादशीमनुवाके मंत्राः समाप्यते॥ ॥चतुर्गृहीतहो
ममंत्रः॥ अग्नाविष्णू इत्यादि॥ ॥हे अग्नाविष्णू सजोषसा समानप्री
तीं नवेतां॥ वायुवर्धनः इमा गिरः स्तुतिरूपा वाचः वर्द्धंतु वृद्धिं प्राप्नुवं
तु॥ युवामपि द्युम्नैर्धनैर्वाजेभिरन्नैश्च युक्तौ आगतौ तं उ द्रागच्छतं। ६
अथैकादशात्मको मंत्र उच्यते॥ अनुवाकनेदस्य यज्ञसंयुक्ते कर्म
णि पृथक् मंत्रत्वपानाग्रेयत्वाडुपपद्यत इति॥ तत्र प्रथमो प्रथमोनु
वाकः॥ ॥वाजश्चेत्यादि॥ ॥वाजोन्नं॥ चशब्दो वक्ष्यमाणद्रव्यापेक्षया
समुच्चयार्थः॥ मम कल्पतामिति पदं दशमानुवाके वक्ष्यमाणं सर्वत्रा

नुषज्यते॥ संपद्यतामित्यर्थः॥ प्रसवोऽन्नस्याभ्यनुज्ञानं। प्रयतिः शुद्धिः।
प्रसितिर्बंधनमत्रविषयमौत्सुक्यं। धीतिरन्नधारणं॥ क्रतुरन्नहेतु
र्यज्ञः॥ स्वरो मंत्रगत उदात्तादिः श्लोकः स्तुतिः। श्रावः श्रावयितृत्वसाम
र्थ्यं। श्रुतिश्रवणसामर्थ्यं। ज्योतिः प्रकाशः सुवः स्वर्गः। प्राणापानाव्यान
वृत्तिविशेषाः॥ समस्तवृत्तिमान्वायुः चित्तं मनोजन्यं॥ ज्ञानं। आधी
तं तेन ज्ञानेन सर्वदा विषयीकृतं॥ वागादयः प्रसिद्धाश्चत्वारः। दक्षो
ज्ञानेंद्रियगतं कौशलं। बलं कर्मेंद्रियगतं सामर्थ्यं। ओजो बलहेतुरष्ट ३७
मो धातुः॥ सहो वैरिविषयमभिभवितृत्वं॥ आयुः प्रसिद्धं। जरा आ

युषो बलीपलितादिपर्यन्तत्वं। आत्मा शास्त्रप्रसिद्धः परमात्मा। तनूः शोभ
नसन्निवेशं वपुः शर्म सुखं। वर्म शरीररक्षकं कवचादि। अंगानि संघ
र्णावयवाः॥ अस्थानि यथास्थानमस्थितान्यस्थीनि। परूंषि अंगुल्या
दिपर्वाणि शरीराणि पूर्वमनुक्ताः शरीरावयवाः॥ ॥द्वितीयमाह॥ ॥
ज्यैष्ठ्यं प्रसस्तत्वं। आधिपत्यं स्वामित्वं। मन्युनामशब्दौ क्रोधावांतरावि
शेषवाचिनौ। एको मानस एको हस्तादिलिंगजन्यो बाह्यः अमो ऽप्रमे
यत्वं विरोधिनिरियत्तयापरिच्छेत्तुमशक्यत्वं। अंभः शैत्यमाधुर्योपे
तमुदकं॥ जेमा जयसामर्थ्यं। महिमद्लं जयसंपादित धनादिसंपत्तिः।

वरिमा वरणीयत्वं ॥ प्रथिमा गृहक्षेत्रादिविस्तारः ॥ वर्ष्म पुत्रपौत्राश
रीराणि । द्राघुया पुत्रपौत्रादिविषयदीर्घत्वं । अविच्छिन्ना संततिरित्यर्थः ।
वृद्धं प्रभूतमन्नं धनं च । वृद्धिर्विद्यादिगुणैरुत्कर्षः । सत्यं यथार्थभाषणं
श्रद्धा परलोकास्तीति बुद्धिः । जगज्जंगमं गवादि धनं सुवर्णादि । वशः सर्वे
षां स्वाधीनत्वं । त्विषिः शरीरकांतिः । क्रीडा द्यूतादिः । मोदस्तज्जन्यो हर्षः । जा
तं पूर्वसिद्धमपत्यं जनिष्यमाणं । भविष्यदपत्यं । सूक्तं ऋक्समूहः । सुकृतं
तज्जन्यमपूर्वं वित्तं पूर्वलब्धं । वेद्यमितः परं लब्धव्यं द्रव्यं न तु जातं । भूतं ३८
पूर्वसिद्धं क्षेत्रादि । भविष्यत्सेत्स्यमानं । सुगं सुष्ठु गंतव्यं बधुजनयुक्तग्रामां
न्त

तरादि । सुपथं चोरादिरहितो मार्गः । ऋतं अनुष्ठितसत्रफलं । ऋद्धिः अ
नुष्ठास्यमानसत्रकल्पं । कॢप्तं समर्थं स्वकार्यक्षमं द्रव्यं । कॢप्तिः स्वकीय
सामर्थ्यं । मतिः पदार्थनिश्चयः । सुमतिर्दुर्घटराजकार्यादिनिश्चयः ॥ ॥
इति द्वितीयोऽनुवाकः ॥ ॥ अथ तृतीयमाह ॥ ॥ शं शब्द ऐहिकसुखवा
ची ॥ मयः शब्द आमुष्मिकसुखवाची । प्रियं प्रीतिकारणं कं वस्तु ॥ अ
नुकामोऽनुकूलत्वनिमित्तेन काम्यमानपदार्थः । एतदुभयमैहिक
मेव तारतम्योपेतं । कामः आमुष्मिकः स्वर्गादिः । सौमनसो मनःस्वा
स्थ्यकरो बंधुवर्गः ॥ भद्रं कल्याणमिह लोके रमणीयं श्रेयः परलोकहि

ते। वस्यः विवाहे तु गृह्यादिः। यशः। कीर्त्तिः। नगः सौभाग्यं द्रविणं धनं। यंता नियामक आचार्यादिः। धर्त्ता पोषकः पित्रादिः। क्षेमो विद्यमान धनस्य रक्षण शक्तिः। धृतिर्धैर्यमापद्यपि निश्चलत्वं। विश्वं सर्वजनानुकूल्यं। महः प्रजा। संविच्छास्त्रादि विज्ञानं। ज्ञात्रं ज्ञापयितृ सामर्थ्यं। सूः पुत्रादि प्रेरणसामर्थ्यं। प्रसू भृत्यादि प्रेरणसामर्थ्यं। सीरं गोलांगलादि कृषि साधन संपत्तिः॥ लयस्तत्र निर्बंधनिवृत्तिः। ऋतं यज्ञादिकर्म। अमृतं तत्फलं। अयक्ष्मं राजयक्ष्मादिकप्रबलव्याधिराहित्यं। अनामयत् ज्वरशिरोव्याध्यल्पव्याधिराहित्यं। जीवातुः जीवनकारणं व्याधिपरिहारार्थमौषधं। दीर्घायुत्वमपमृत्यु राहित्यं। अनमित्रं वैरिराहित्यं। सुगं शोभनगमनं सर्वैरंगीकृताचरणमित्यर्थः। शयनं शय्योपधानादि संपत्तिः। सूषा स्नान संध्यावंदनादि युक्तः। शोभनः प्रातः कालः। सुदिनं यज्ञदानाध्ययनादि युक्तं दिनं॥ ॥इति द्वितीयोऽनुवाकः॥ ॥अथ चतुर्थमाह॥ ॥ऊर्क्च मेत्यादि॥ ॥ऊगन्न्य सामान्यं। सूनृता प्रियोक्तिः। पयः पयः प्रभृतयोऽन्नविशेषाः। रसः क्षीरं। घृतं तत्रत्यं सारं मधु प्रसिद्धं। सग्धिः सह भुक्तिः सहभोजनमित्यर्थः। औद्भिद्यं उद्भिदां तरं गुल्मादीनामुत्पत्तिः। रयिः सुवर्णं। रायो मणिमुक्तादिः। पुष्टं ह्येवेक्ति मे वसु वर्ण

मि तथा सपीतिः मद्यपानं। कृषीहष्टीश्च न स्पष्टेतुल्येन प्रसिद्धे। जैत्रं जयशीलमुहूर्तमित्यर्थः।

मिति समृद्धं। पुष्टिः शरीरपोषः। विभ्वादये अक्षित्यांत धान्यविष
याउत्तरोत्तराभिवृद्धयः। समस्तपिनारतम्येनं द्रव्याः। नकेवलं दृष्टान्ये
व धान्यानि किंतल्व्यानीत्युच्यंते। कुयवाः कुत्सितायवाः। अन्नं प्रसिद्धं
मा ।अक्षुत् अन्नाभ्यः क्षुत्परिहारः। व्रीहियवमाषतिलमुद्गाः प्रसिद्धाः
खल्वाः मुद्गेभ्योपि स्थूलबीजाः। गोधूमाश्च प्रसिद्धाः। मसुरामुद्गवस्तु
पद्देवनः। प्रियंगवः प्रसिद्धाः। अणवस्सूक्ष्मशालयः। श्यामाकाग्राम्याः।
नीवाराः। आरण्याः॥ ॥इति चतुर्थोऽनुवाकः॥ ॥अथ पंचममाह॥ ॥ ४०
अश्मेत्यादि॥ ॥अश्मादयः प्रसिद्धाः। श्यामं लक्ष्मायसं। लोहं कांस्यता

व

प

म्रादि। अग्न्यादयः प्रसिद्धाः। ग्राम्यारण्याः पशवो यज्ञेन मे निष्पन्नी वृत्तेन क
ल्पंतां। समर्थाभवंतु। वित्तं पूर्वलब्धं। वित्तिर्नविलाभः। भूतं ऐश्वर्योपेतं
पुत्रादिकं। भूतिः स्वकीयमैश्वर्यादिकं। वसुनिवाससाधनं गवादिकं॥
वसतिर्निवासाधारो गृहादिः। कर्म होत्रादिकं। शक्तिस्तदनुष्ठानसाम अग्नि
र्थ्यं। अर्थः प्रयोजनविशेषः। एमः एतव्यसाध्यं सुखं। इतिप्राप्त्युपायः
गतिरिष्टप्राप्तिः॥ ॥इति पंचमोऽनुवाकः॥ ॥अथ षष्ठमाह॥ ॥अग्नि
श्च मइत्यादि॥ ॥अग्न्यादयः प्रसिद्धादेवतास्तैः सर्वैः सह मानभागो
पेतत्वात्॥ इंद्र एकैकया देवतया सह पपच्यते। दिक्शब्देन प्राच्यादि

च तस्र उच्यंते। मूर्धशब्देन चोर्ध्वदिक्क्रमाच मुखत्वानि प्रायेण पृ
थक् निर्दिष्टा॥ ॥इति षष्ठोऽनुवाकः॥ ॥सप्तमाऽ॥ ॥अंशुरि
त्यादिना। अंश्वादयः सोमग्रहविशेषाः सोमप्रकरणे प्रसिद्धाः। अ
दाभ्यस्यैव ग्रहस्य गृह्यमाणत्वदशा पृष्ठ्यत्वरस्मिशब्देन निर्दिश्य तेभ्या
नां तद्ग्रहणं साधनत्वात्। तथा तद्ग्रहणमंत्रः पठ्यते। शुक्रे एगृ
ह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिरिति। अधिपतिशब्देन तदधिग्रहो
विवक्षितः। तस्य च श्रेष्ठत्वादाधिपत्यं अत एव श्रूयते। श्रेष्ठो वा एष ५२
ग्रहाणामिति प्रतिप्रस्थानशब्देन द्विदेवत्यग्रहसदनावी प्रतिनि

धियाख्यो विवक्षितः। ध्रुवाख्यस्यैव ग्रहस्यानयनदशायां वैश्वानर
त्कपागत्॥ तदवसन्नो वैश्वानरशब्देनोच्यते। आदौ विश्वेदेवः।
प्रातःसवनगत उत्तरस्तृतीयं गतसारस्वतग्रहो निषेचनीयार्थ विक्ष
तो द्रष्टव्यः। सारस्वतं ग्रहं गृह्णामीति तत्राम्नानात्। एवं पौष्णोऽपि वि
कृतगामी द्रष्टव्यः॥ इति सप्तमोऽनुवाकः॥ ॥अष्टमाऽ॥ इध्मश्च
मइत्यादि॥ ॥इध्मादीनि यज्ञांगद्रव्याणि यज्ञप्रकरणे प्रसिद्धानि
। गृहाः पत्नीशालादयः। सदः प्रचताः शामित्रादयः। स्रुगाकारः शं
युवाकः तेन यथास्वदेवतानां विर्गमनं॥ ॥इत्यष्टमोऽनुवाकः॥
छ

॥नवममाह॥ ॥अग्निश्चमेत्यादि॥ ॥अग्निश्चीयमानो वह्निः।घर्मः
प्रवर्ग्यः।रुक्मायार्कवते पुरोडाशमिति विहितो यागोऽर्कः।सौर्यं चरुमि
हेन तिविहितो सोमः सूर्यः।प्राणः अश्वमेधः प्रसिद्धः पृथिव्यादयो देवता
विशेषाः शङ्करस्यायमर्थः।अंगुलयोंगुलवद्विरान् पुरुषस्यावयव वि
शेषाः दिशप्राच्याद्याः चशब्दाद्विदिशोपि।ताः सर्वा मे मदीयेन यज्ञेनक
ल्पेतां स्वस्वव्यापार समर्था भवंतु ऋगादयो मंत्रविशेषाः स्तोमसामदृ
न्निरूपं स्तोत्रं दीक्षा यजमानसंस्कारः।तपः पापक्षयार्थमनशनादिः ४२
ऋतुयज्ञांगभूतः कालः।व्रतमेकः स्तनादि अहोरात्रयोः संबंधिनीयाः

वृष्टिस्तया मदीयं सस्यं कल्प्यतामिति विशेषः।बृहद्रथंतरे सामनीते च
मदीयेन यज्ञेन कल्पेतां स्वस्वव्यवहार सामर्थ्यं भवतां॥ ॥इति नवमो
नुवाकः॥ ॥दशममाह॥ ॥गर्भाश्चमइत्यादि॥ ॥गर्भविसाश्चप्रसि
द्धाः॥ सार्द्धसंवत्सरो वत्सरूप पुगवस्त्र्यविः॥ तथाविधा गौस्त्र्यवि।द्वि
वत्सर ऋषभो दित्यवाट् तथाविधा गौर्दित्यवत्सा।त्यौही।सार्द्धद्विवत्सर ऋष
भः पंचाविः।तथाविधा गौः पंचावी।वत्सरत्रयऋषभस्त्रिवत्सः।तथावि
धा गौस्त्रिवत्सा॥ सार्द्धत्रिवत्सर ऋषभस्तुर्यवाट् तथाविधा गौस्तुर्यौही।च
तुःसंवत्सर ऋषभः पष्ठवाट् तथाविधा गौः पष्ठौही।सेचनसमर्थ ऋषभ

उक्षा। वंध्या गौर्वशा। उक्षोपेक्षाधिकवयस्कस्तुऋषभः। गर्भघाति
नी गौर्वेहत्। शकटस्यवाहकोनड्वान्। नवप्रसूता गौर्धेनुः। आयुरा
मा दयः प्रसिद्धाः। अश्मा शरीरं। उक्ता आयुरादयो मदीयेन यज्ञेनय
ज्ञः करिष्यमाणोऽश्वमेधादिः सोऽप्यनेनानुष्टीयमाणेन यज्ञेन स्वका
र्यक्षमो न वेत्॥ ॥इति दशमोऽनुवाकः॥ ॥एकादशमाह॥ ॥एका
चेत्यादि॥ ॥एकादिशब्दाः संख्यापराः। वाजादयस्तवेमसंतु इति
शेषः। वाजोन्नं प्रसवस्तस्योत्पत्तिः॥ अपिजस्तस्यैव पुनःपुनरुत्पत्तिः। ४३
क्रतुः संकल्पो योगादिविषयः। यागो वा। सुवस्तस्योत्पत्तौ हेतुरादित्यः।

अथ वाजादयश्चैत्रादिमासानां नामविशेषाः। तदानींते सर्वे प्राणं
त्विति वाक्यशेषः। चकारापरस्य रसमुच्चयार्थाः। अनुक्तकालादिदे
वतासमुच्चयार्थावा॥ यथोक्तैकादशानुवाकरूपमंत्रसाध्यं होमं वि
धत्ते वसोर्धारामित्यादि उपतिष्ठते। इत्यंतेन। वसोर्धनस्य धारासा
तत्यं यथा कुल्या तन्यते सेयमाहुतिर्वसोर्धारा एतां जुहुयात्। तदेतदु
क्तनिर्वचनं स्पष्टयते। यो जुहोति स प्रथमं मम धनं नैरंतर्यं
स्यादित्येवं कामयेत तत्स्तेनेयमाहुतिर्हूयते। तेन होमेनैनं यजमा
नं स्वर्गेलोके घृतस्य धारा पिन्वमाना उपतिष्ठन्ती सेवते। तत्र द्रव्यं विधा

न्ने। आज्येनेत्यादि रुंधइत्यंतेन। सुवर्णादिधनसमृद्धेरपि ध्रुवंतेजो
रूपत्वं प्रसिद्धं। कामप्रीतिहेतुत्वेनापि तामाकृतिं प्रशंसंति अयोरुंधइ
ति। अन्वयव्यतिरेकाभ्यां सातत्यं विधत्ते। यंकामयते संतनोतीति यस्य
यजमानस्य प्राणमन्नंच विछिंद्यामित्येवं द्विषन्नध्वर्युरेतंमंत्रं मध्येव्य
स्तकुरूयात्। यस्तु प्राणमन्नस्य सातत्यं कामयते सोपि संतताम् आकृ
तिं कुरूयात्। अथवाजश्चमइत्यादीन्यन्नंचमक्षुच्चमइत्यंतः प्राकृता
निचतुश्चत्वारिंशदधिकशतसंख्याकानि वाक्यानि तानि द्वादशसंघ ४८
रूपेण विभज्य प्रशंसति द्वादशरूधइति। द्वादशानां वाक्यानां समूहो

द्वादशशतानि च द्वादशानि पुनर्द्वादशसंख्याकानि तथा संति चतु
श्चत्वारिंशदधिकशतसंख्या संपद्यते। तदंतर्गतद्वादशसंख्यायाः संव
त्सररूपत्वात् संवत्ससाध्यं मन्नं प्राप्नोति॥ अथचतुर्थानुवाकः॥ ॥
तानि वाक्यानि प्रशंसंति। अग्निरुंधइति। अग्नेः पावकहेतुत्वादन्न
योनित्वं। अपां चौषधिजनकत्वादन्नयोनित्वं। एतन्मंत्रपाठेनानेक
प्रकारमन्नं मन्नं प्राप्नोति॥ अथषष्ठानुवाकगतानि वाक्यानि प्रशंसं
ति। अर्धेंद्राणि जुहोतीति॥ तेषां वाक्यानां मध्ये द्विंद्वः पठ्यते तान्यर्धें
द्राणि तेषु वाक्येषु अग्नीसोमादीनां देवतानां पूर्वार्धे श्रम्नास त्वादेवताः।

प्राप्नोति यद्यस्मात्कारणात्सर्वेषां वाक्यानां प्रत्यर्द्धमिंद्रः प्रत्येकमिं
द्रः पठ्यते। तस्मात्कारणादेषामिंद्रोभूयिष्ठभाक्तमः। भूयिष्ठं प्रभू
नेढविर्नसयति इति भूयिष्ठभाक् अतिशयेन तादृशः। यस्मादिदमं
त्योत्तरार्द्धगतं प्राह। तस्मादस्मिन्यजमानेप्युपरिष्टाच्छिरोभागे चक्षुरा
दीन्द्रियं स्थापयति सप्तमाष्टमयोरनुवाकयोरवस्थितानि वाक्यानि
प्रशंसयति यज्ञायुधानिरुंधइति। एषां वेदादियज्ञरूपाणि यज्ञसा
धनानि साक्षाद्य निष्पादकत्वात्॥ यज्ञस्वरूपाणि। इध्मबर्हिरादित्य
भिः यज्ञः परंपरया निरूप्यते। नैतुयइइव॥ साक्षान्निष्पद्यते॥ त ४५

नतु

स्मानानि यज्ञस्वरूपं। एतैरंतरंगैर्बहिरंगैश्च यज्ञायुधैर्यज्ञं प्राप्नो
ति अंतिमस्य स्वगाकार वाच्यस्य तात्पर्यं तं दर्शयति। अवभृथः रुं
धइति। यज्ञादिभिः ब्राह्मणकर्मनिष्पत्तेरेषां ब्रह्मवर्चस्वरूपत्वं। त
स्मिन्नेवानुवाक उत्तरार्द्धगतानि वाक्यानि प्रशंसति। ऋकरुंधइति
ऋगादिकं छंदसां वेदानां स्वरूपमिति तत्वमिद्धं। दशमानुवाके पूर्वा
र्द्धगतवाक्यानि प्रशंसति गर्भारुंधइति गर्भवत्सादीनां पशुरूपत्वं प्र
सिद्धं तस्मिन्ननुवाक उत्तरार्द्धगतानि वाक्यानि प्रशंसति। कल्पान्नु
होत्यक्रमकृत्याइति। आयुर्यज्ञेन कल्पतामित्यादयो मंत्राः कल्पाः

पूर्वंयद्दश्मंकृपस्त्वकार्यसमर्थनंभवतितस्यसामर्थ्यायहोमः।एकाद
शानुवाकेपूर्वभागतानिवाक्यानिप्रशंसति।युग्मदयुजेजुहोतिमिथु
नत्वायेतिचतस्रश्चमेष्टौचमइत्यादिकंसमसंख्यारूपंयुग्मं।एका
चमेतिस्रश्चमइत्यादिविषमजंरूपमयुग्मंराशिद्वयंस्त्रीपुरुषवत्।
परस्परविलक्षणत्वान्मिथुनकत्वायसंपद्यते।राशिद्वयेप्युत्तराधिका
रंप्रशंसति।उत्तरावतीभवतोभिक्रोत्याइति।एकत्वादुत्तरंत्रित्वंतथा
चतुर्थाउत्तरमष्टमत्वं।एवमुभयोरुत्तरावत्वेनाभिहिताव्याप्तिर्भव ४६
ति।युग्मायुग्मेसंख्यावाचशब्दानांतात्पर्यंदर्शयति।एकाचमेरुंधइति

विषमसंख्यादेवानांप्रियाणिछंदांसिनिष्पाद्यंते।समसंख्यातु
मनुष्यप्रियाणिअतस्तउभयंप्राप्नोतिराशिद्वयेप्युत्तरोत्तरसंख्या
वृद्धेरवधिंप्रशंसति।त्रयःत्रिंशतःरुंधइति।अस्मिन्ननुवाकउत्त
रभागगतानिवाक्यानिप्रशंसति।वाजतिष्ठतीतिअन्नवियोगसंग्रहः।
अग्नाविष्णूवसोर्धारामेकादशानिरादितअनुवाकेजुहोत्येकामाहुतिं
सततांददाति॥ ॥इतिसायणाचार्यविरचितेमाधवीयेवेदार्थप्र
काशेयजुःसंहितायांचमकभाष्येएकादशोऽनुवाकः॥समाप्तः॥
॥ ॥संवत्१८२५नाआषाढसुदी१५गुरोलेखः॥ ॥शुभंभवतु

॥ ॥ दीक्षित दयाशंकरात्मज दी० । करुणाशंकरेण लिखितं ॥
पंडोलश्रीप चिरंजीविनाइरुदेरांम पठनार्थं ॥ ॥ श्री ॥ ॥
॥ ॥ मंगलमस्तु ॥ ॥ क ॥ ल्या ॥ ण ॥ म ॥ स्तु ॥ ॥ छ ॥

पंडेसतोदासकुंनैसीवारपद्यासषापुन्तकमथवानेरूपैया ७